K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ चण्डेश्वरमन्त्रविधानमुच्यते –

त्रित ऋषिः । अनुष्टुप् छन्दः । चण्डेश्वरो देवता । चं बीजम् । फट् शक्तिः । दीप्तफट् हृदयम् । ज्वलफट् शिरः । ज्वालिनीफट् शिखा । तटफट् कवचम् । हनफट् नेत्रम् । सर्वज्वलिनि फट् अस्त्रम् ।

अव्यात्कपर्दकलितेन्दुकलः करात्त-
शूलाक्षसूत्रकमण्डलुटङ्कवंशः(हस्तः) ।
रक्ताभवर्णवसनोऽरुणपङ्कजस्थो
नेत्रत्रयोल्लसितवक्त्रसरोरुहो वः ॥

ऊर्ध्वफट् इति मन्त्रः ॥ वश्यैश्वर्यफलप्रदः । त्रिलक्षं जपेत् । त्रिमधुरसिक्तैस्तिलतण्डुलैः दशांशं पुरश्चरणहोमः, व्याघातैर्वा ॥

व्याघातं–கொன்றை.

अथ पूजा –

प्रासादोक्तशैवपीठे समावाह्य समर्चयेत् । अङ्गैः प्रथमावृतिः । मातृभिः द्वितीया । लोकेशैस्तृतीया ।

अथ प्रयोगः –

कृत्वा पिष्टेन शाल्याः प्रतिकृतिमनलं चापि काष्ठश्रिताना-
माधायारभ्य पुंसस्त्रिमधुरलुलितां दक्षिणांगुष्ठदेशात् ।
छित्वा छित्वाष्टयुक्तं शतमथ जुहुयाद्योपितो वामपादात्
विप्रादीनां चतुर्णां वशकरमनिशं मन्त्रमेतध्दुतान्तम् ॥

तत्र स्त्रियः प्रतिकृतिश्चेत् वामपादादारभ्य पुंपश्चेत् दक्षिणांगुष्ठादारभ्य छित्वा छित्वा हुनेत् इत्यर्थः ॥

प्रयोगान्तरम् —

अनुदिनमष्टशतं यो जुहुयात्पुष्पैरनेन मन्त्रेण ।
सप्तदिनैस्स तु लभते वासस्तद्वर्णसंकाशम् ॥

चण्डचण्डाय विद्महे चण्डेश्वराय धीमहि । तन्नश्चण्डः प्रचोदयात् । इति चण्डेशगायत्री ॥ चं इति बीजम् ॥

अथ चण्डेश्वरमन्त्रप्रसङ्गात् क्षेत्रपालमन्त्रोपि लिख्यते —

ऋष्यादयः प्रसिद्धाः ॥ ओं नमो भगवते क्षेत्रपाल*व्यग्राय सर्वभूषणाय कपालडमरुखड्गाङ्गत्रिशूलधारिणे ह्रूं ह्रीं हुं फट् स्वाहा ॥ अनेन मन्त्रेण भूतभविष्यत्ज्ञानं भविष्यति ।

अथातीतादिज्ञानप्रदक्षेत्रपालप्रसङ्गात् अतीतादिज्ञानप्रदकर्णविद्यामन्त्रोपि लिख्यते —

ऋष्यादयः प्रसिद्धाः । ह्रां इत्यादिषडङ्गम् ।

ध्यानम् —

कनकैर्वज्रवैडूर्यरत्नैर्मरतकैरपि ।
कृतकुण्डलहाराद्यैर्भूषिता नित्यशो भवेत् ॥

ह्रीं हे कर्णविद्ये मम कर्णविवरमनुप्रविश्यातीतानागतवर्तमानं मम कर्णे वद वद स्वाहा ॥

इति श्रीप्रपञ्चसारसारसंग्रहे गीर्वाणेन्द्रविरचिते सप्तविंशः पटलः ॥

---

* व्यग्राय इति ख ग घ ङ पाठः ।